मम्मटभट्ट

नं० २५३-घ

काव्यप्रकाशः (अपूर्णः)

नं० २५३-घ
पत्राणि ०-९

काव्यप्रकाशः १

ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां परामृशति १ग्रन्थकृत्

॥सीताराम
काव्यप्र॥
॥१॥
1

श्रीगायत्र्यै नमः॥ श्रीरामचन्द्राय नमः॥ नियतिकृतनियमरहितां ह्ला
दैकमयीमनन्यपरतन्त्राम्। नवरसरुचिरां निर्मितिमादधती भारती
कवेर्जयति॥१॥ नियतिशक्त्या नियतरूपा सुखदुःखमोहस्वभावाप
रमाण्वाद्युपादानकर्मादिसहकारिकारणपरतन्त्रा षड्रसान
वतैर्हृद्यैव तत्स्वरूपेण निर्मितिः निर्माणमेतद्विलक्षणा तु कविवाङ्नि
र्मितिरत एव जयति। जयत्यर्थेन नमस्कार आक्षिप्यत इति तां प्रत्यस्मि प्र
णत इत्यवगम्यते। इहाभिधेयं सप्रयोजनमित्याह॥ काव्यं यशसे ॥राम:॥
र्थकृते व्यवहारविदे शिवेतरक्षतये॥ सद्यः परनिर्वृतये कान्तास ॥१॥
म्मिततयोपदेशयुजे॥२॥ कालिदासादीनामिव यशः॥ श्रीहर्षादे

र्घावकादीनामिव धनम्॥ राजादिगतोचिताचारपरिज्ञानम्॥ आ
दित्यादेर्मयूरादीनामिवाऽनर्थवारणम्॥ सकलप्रयोजनमौलि
भूतं। समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमा
नन्दं॥ प्रभुसम्मितशब्दप्रमाणावेदादिशास्त्रेभ्यः॥ सुहृत्सम्मितार्
र्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन
रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत् काव्यं लोकोत्तरव
र्णनानिपुणकविकर्म तत् कान्तेव सरसतापादनेनाभिमुखी
कृत्य रामादिवद्वर्त्तितव्यं न रावणादिवदित्युपदेशं च यथायो
गं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम्॥॥

॥सीताराम॥
काव्यप्र॥
॥२॥

एवमस्यप्रयोजनमुक्त्वाकारणमाह॥ शक्तिर्निपुणतालोकशास्त्रका
व्याद्यवेक्षणात्॥ काव्यज्ञशिक्षयाभ्यासइतिहेतुस्तदुद्भवे॥३॥श
क्तिः कवित्वबीजरूपः संस्कारविशेषः॥ यांविना काव्यंनप्रसरेत्॥
प्रसृतंवाउपहसनीयंस्यात्॥ लोकस्यस्थावरजंगमात्मनोलो
कवृत्तस्यशास्त्राणांछन्दोव्याकरणाभिधानकोषकलाचतु
र्वर्गगजतुरङ्गखड्गादिलक्षणग्रन्थानांकाव्यानांमहाकवि
निबद्धानांम्॥ आदिग्रहणादितिहासादीनांचविमर्शनाद्व्यु ॥रामः॥
त्पत्तिः॥ काव्यंकर्तुंविचारयितुंयेजानन्तितदुपदेशेनकरणेयो ॥२॥
जनेचपौनःपुन्येनप्रवृत्तिरितित्रयःसमुदितानतुव्यस्तास्तस्यक

व्यस्योद्भवे निर्म्माणे समुल्लासे च हेतुः॥ न तु हेतवः॥ एवं मुक्त्वा स्वरूपमा
हा॥ तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि॥ दोषगुणालङ्कारा
वक्ष्यन्ते॥ क्वापीत्यनेनैतदाह॥ सर्व्वत्र सालंकारौ क्वचित्तु स्फुटालंकारवि
रहेपि न काव्यत्वहानिः॥ यथा॥ यः कौमारहरः स एव हि वरस्ता एव चै
त्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः॥ सा चैवा
स्मि तथापि तत्र सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले
चेतः समुत्कण्ठते॥ ४॥ अत्र स्फुटो न कश्चिदलङ्कारः॥ रसस्य हि प्राधा
न्यान्नालंकारता॥ तद्भेदानाह॥ इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्या

क्रमे १

ध्वनिर्बुधैः कथितः ॥ इदमिति काव्यं बुधैर्वैयाकरणैः प्रधान
भूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः
ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्ष
मस्य शब्दार्थयुगलस्य ॥ यथा ॥ निःशेषच्युतचन्दनं स्तनतटं नि
र्मृष्टरागोऽधरो नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ॥ मिथ्या
वादिनि दूति बान्धवजनस्याज्ञातपीडागमे वापीं स्नातुमितो ग
तासि न पुनस्तस्याधमस्यान्तिकम् ॥ ५ ॥ अत्र तदन्तिकमेव रन्तुं
गतासीति प्राधान्येनाधमपदेन व्यज्यते ॥ अतादृशि गुणीभूत

यथैवं त्रिगैनुमध्यमम्॥ अनाहशिवाखादननिशायिनि॥ यथा॥ ग्रामत
रुणंतरुणापानवंवञ्जुलमञ्जरीसनाथकरम् पश्यन्त्याभवतिमु
हुर्नितरां मलिनामुखच्छाया॥ ॥अत्र वञ्जुललतागृहे दत्तसंकेता
नागतेति व्यंग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारका
रित्वात्॥ शब्दार्थचित्रं यत्काव्यं व्यंग्यं त्ववरं स्मृतम्॥ चित्रमिति
गुणालङ्कारयुक्तम्॥ अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहि
तम्॥ अवरमधमम्॥ यथा॥ स्वच्छन्दोच्छलदच्छकच्छकुहरच्छा
तेतराम्बुच्छटामूर्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः॥

मिं घ्रादुघदुदार दर्दुरदरी दीर्घादरिद्रद्रुमद्रोहोद्रेकमहो
र्मिमेदुरमदा मन्दाकि नीम न्दताम् ॥ ॥वि
निर्गतं मानदमात्ममन्दिराद्भवत्युपश्रुत्य यदृच्छयापि
यम् ॥ससंभ्रमे न्द्रद्रुतपातितार्ग
लानिमी लिताक्षीव भियामरावती ॥ ॥ ॥

॥इति काव्यप्रकाशे काव्यप्रयोजनस्वरूपकारणावि
शेषनिर्णयो नाम प्रथम उल्लासः॥ १ ॥

संर्तुंप्रेसयितानयुक्तमितिनिवार्यते ॥ अन्यत्र यूयंकुसुमावचायंकुरुध्वम
त्रास्मिकरोमिसख्यः ॥ नाहंहि दूरंभ्रमितुंसमर्था प्रसीदतायंरचितोऽञ्जलि
र्वः ॥ अत्रविविक्तोऽयंदेश इतिप्रच्छन्नकामुकत्वयाविसर्ज्जयितुमाश्वस्तां
प्रतिकयाविन्निवेद्यते ॥ गुरुअणापरवसपिअकिंभणामितुहमंद
भाइणी अहअं ॥ अज्जपवासंवच्चसि वच्चसअंजेव्वसुणसिकरणि
ज्जं ॥ अत्रअघमधुसमयेयदिव्रजसितदाऽहंतावन्नभवामितवच
नजानामिगतिरितिव्यज्यते ॥ आदिग्रहणाद्वैशादेः ॥ यथा ॥ द्वारोपान्तनि
रन्तरेमयितयासौन्दर्यसारश्रियाप्रोल्लास्योरुयुगंपरस्परसमासक्तंसम

सीताराम
काव्यप्र
१५
15

मासा दिनम् यानी तो पुरतः क्षिरीं शुकमधुः सिफ्रेचलेलोंव
नेवाचलस्य निवादितं प्रसरणासं कोवितं दोर्लनि अत्रवेह
योप्रच्छन्न कामुकविषय पत्रा कृतविशेषोध्वन्यते॥ निराकां
क्षप्रतिपत्तये प्राप्तावसरतया पुनः पुन हृदाह्रियते॥ वक्त्रादी
नां मिथः संयोगा द्विकाता द्भेदे ऽनेनक्रमेण लक्ष्यव्यंग्य
पोऽथव्यञ्जकत्वमुदाहार्यम्‌ एद्धकमेदे वक्त्रबोद्धव्ययोर्यथा॥ रामः
अत्ताएत्थणिमज्जाइ एत्थग्रहं दिम्रहस्स हि मापहिम्ररअत्तिअ्रव १५

सर्वपुत्लोगस्य ७

असेऽज्ञा एम ● हारोग मञ्जु हिस॥ शब्दप्रमाणवेद्यो र्थोव्यनक्त्यर्थान्तरं यतः॥ अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता॥ शब्देति॥ नहि प्रमाणान्तरवेद्यो व्यञ्जकः४॥ इतिश्रीकाव्यप्रकाशेऽर्थनिर्णयस्तृतीयोल्लासः॥

यद्यपिशब्दार्थयोर्निर्णये कृते दोषगुणालङ्काराणां स्वरूपमभिधानीयं तथापिधर्मिप्रदर्शिते धर्माणां हेयोपादेयता ज्ञायते इति प्रथमं काव्यप्रभेदानाह॥ अविवक्षितवाच्योयत्त्रवाच्यंभवेद्ध्वनौ। अर्थान्तरे संक्रमितमत्यन्तंवातिरस्कृतम्। लक्षणामूलगूढव्यंग्यप्राधान्येसति अविवक्षितं वाच्यं यत्र स ध्वनाविति अनुवादाद्ध्वनिरितिविज्ञेयः तत्रवाच्यं क्वचि

काव्यप्रकाश

सा १६ दनुपजुज्यमानत्वादर्थान्तरे परिणतं यथा ॥ त्वामस्मि वच्मि विदुषां समुदा
योऽत्र तिष्ठति ॥ आत्मीयां मतिमादाय स्थितिमत्र विधेहि तत् ॥ अत्र वचनादि
पदेशादिरूपतया परिणामतिः ॥ क्वचित्पुनरनुपजुज्यमानत्वाद् अत्यन्त
तिरस्कृतं ॥ यथा ॥ उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता प
रम् ॥ विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतम् ॥ एतद्वा
पकारिणं प्रति विपरीतलक्षणया कश्चिद्वक्ति ॥ विवक्षितं चान्यपरं वाच्यं
यत्रापरस्तु सः ॥ अन्यपरं व्यंग्यनिष्ठम् ॥ एष च ॥ कोऽप्यलक्ष्यक्रमव्यंग्यो
लक्ष्यव्यंग्यक्रमः परः ॥ अलक्ष्येति ॥ न खलु विभावानुभावव्यभिचारिण ॥ राम ४ ॥
एव रसः ॥ अपि तु रसस्तैरित्यस्ति क्रमः स न लक्ष्यते ॥ तत्र रसभावतदाभासभा ॥ १६ ॥

सभावाशान्त्यादिरसक्रमः॥ भिन्नोरसाद्यलंकारादलंकार्य्यतयास्थितः॥ आदि
ग्रहणाद्भावोदयभावसन्धिभावसबलत्वानि॥ प्रधानतयायत्रस्थितोरसादि
स्तत्रालंकार्य्यः॥ यथोदाहरिष्यते॥ अन्यत्रतु प्राधान्येवाक्यार्थेयत्रांगभूतोरस
स्तित्रगुणीभूतव्यंग्ये सवत्प्रेयऊर्ज्जस्विसमाहितादयोलंकाराः॥ तेचगुणीभू
तव्यंग्ये प्राधान्ये उदाहरिष्यन्ते॥ तत्ररसस्वरूपमाह॥ कारणान्यथकार्य्याणिस
हकारीणियानिच स्थायिनोलोके तानिचेन्नाट्यकाव्ययोः विभावानुभावस्त
कथ्यन्तेव्यभिचारिणः व्यक्तःसतैर्विभावाद्यैःस्थायिभावोरसस्स्मृतः॥ उक्तंच भ
रते। विभावानुभावव्यभिचारिसन्निष्पत्तिरिति एतद्विवृणवते विभावैर्ललनो
द्यानादिभिरालंबनोद्दीपनकारणैः स्थायीरत्यादिकोभावोजनितः अनुभा

सीताराम
काव्यप्रका
१७

वैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः व्यभिचारिभिर्नि
र्वेदादिभिः सहकारिभिरूपचितो मुख्यया वृत्त्या रामादावनुकार्ये तद्रू
पतानुसंधानान्नर्तकेपि प्रतीयमानरस इति भट्टलोल्लटप्रभृतयः
राम एवायमयमेव राम इति न रामोयमित्यौत्तरकालिके बाधे रामो
यमिति रामः स्याद्वा न वेति रामसदृशोयमिति सम्यङ्मिथ्यासंशय
सादृश्यप्रतीतिविलक्षणया चित्रतुरगादिन्यायेन रामोयमिति प्र
तीतिग्राह्येनटे ॥ सेयं ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकि
का दृशोः ॥ मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गता ॥ रामः
१७

दैवादहमद्यतया चपलायतनेत्र्या वियुक्तश्च अविरलविलोलजलदः का-
लः समुपागतश्चायमित्यादिकाव्यानुसन्धानबलाच्छिक्षाभ्यासनिर्व-
र्तितस्वकार्यप्रकटनेनैव प्रकाशितैः कारणकार्यसहकारिभिः कृत्रि-
मैरपि तथाऽनभिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः संयोगाद्गम्य-
गमकभावरूपादनुमीयमानोऽपि वस्तुसौन्दर्यबलाद्रसनीयत्वेना-
न्यानुमीयमानलक्षणः स्थायित्वेन संभाव्यमानो रत्यादिर्भावस्तत्रा-
सन्नपि समाजिकानां वासनात्मकतया चर्व्यमानो रस इति श्री-
शङ्कुकः। नतातटस्थ्येन नात्मगतत्वेन रसः प्रतीयते नोत्पद्यते ना-

सीताराम
काव्यप्र
१८
18

भिव्यज्यते अपितु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीक
रणात्मना भावकत्वव्यापारेण भाव्यमानः स्थायिसत्वोद्रेकप्रकाशानं
दमयसंविद्विश्रान्तिसतत्वेन भोगेन भुज्यत इति भट्टनायकः लोके प्र
मदादिभिः कारणादिभिः स्थाय्यनुमाने अभ्यासपाटववतां काव्ये ना
ट्ये च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्वादलौकि
कविभावादिशब्दव्यवहार्यैर्ममैवैते तटस्थस्यैवैते न इति सम्बन्धिवि
शेषस्वीकारपरिहारनियमानाध्यवसायात्साधारण्येन प्रतीतैरभि
व्यक्तः सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको नियतप्र

रामः
१८

मातृगतत्वेनास्थितोपि साधारणोपायवलात्तत्कालविगलि
तपरिमितप्रमातृभाववशोन्मिषितवेद्यान्तरसंपर्कशून्यापरिमितभावे
न प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभि
न्नोपि गोचरीकृतश्चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः पान
करसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वा
ङ्गीणमिवालिङ्गन्नन्यत् सर्वमिव तिरोदधद्ब्रह्मास्वादमिवा
नुभावयन्नलौकिकचमत्कारी शृङ्गारादिको रसः स च न कार्यः विभा
वादिनाशेपि तस्य संभवप्रसङ्गात् नापि ज्ञाप्यः सिद्धस्य तस्याभावात्

सीताराम
का०प्र०
१९
19

स्थायिनस्तु विभावादिभिर्व्यञ्जितस्य [illegible]णी[illegible]यः कारकज्ञापकाभ्यामन्यत्वं दृष्टि
त्तिवेन्नाख्य विदृष्टमित्यलौकिकत्वसिद्धेर्भूषणमेव न तु दूषणं चर्वणानिष्प
त्त्या [illegible] तस्य निष्पत्तिरूपचरितेति कार्योप्युच्यते लौकिकप्रत्यक्षादिप्र
माणताटस्थ्यावबोधशालिमितयोगिज्ञानवेद्यस्पर्शरहितस्वात्ममा
त्रपर्यवसितपरिमितेतरयोगिसंवेदनविलक्षणलोकोत्तरस्वसं
वेदनगोचर इति प्रत्ययेनाप्यभिधीयताम् तद्ग्राहकं च न निर्विकल्प
कं विभावादिपरामर्शनप्रधानत्वात् नापि सविकल्पकं चर्व्यमा
णस्यालौकिकानन्दमयस्य तस्य स्वसंवेदनसिद्धत्वात् उभयाभावरूप

राम:
१९